दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-268

1 21.07.2024 रविवासरः वि.सं. २०८० आषाढ़पूर्णिमा श्रावण 06 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## सर्वेषु विमानस्थात्रेषु विमान-संचालन-प्रक्रिया सामान्यरूपेण समारब्धा - नागर-विमाननमंत्रालयः



**हिमसंस्कृतवार्ताः।**नागर-विमानन मंत्रालयेन प्रोक्तं यत् सर्वेषु विमानस्थात्रेषु विमान-संचालन-प्रक्रिया सामान्यरूपेण समारब्धा अस्ति । माइक्रासॉफ्ट इत्यस्मिन् जातेन अवरोधेन ह्यः विमानसेवाः प्रभाविताः अभवन् । एकस्मिन् वक्तव्ये मंत्रालयेन प्रोक्तं यत्, यत्किमपि अवरोधं आपतितम् आसीत् तत् दूरीकर्तुं प्रयासः क्रियते । इदमपि कथितं यत् सर्वकारेण विमान-परिचालनं निरन्तरं निरीक्ष्यते । विमानसेवा-प्रदातृ-संस्थानानि यात्रायाः समायोजनं यात्राशुल्कस्य प्रत्यावर्तनम् अपि सुनिश्चितं कुर्वन्ति ।

## पद्मश्रीपुरस्कृतकमलापुजारी इत्यस्या निधनेन शोकं प्रकटितवान् प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी पद्मश्रीपुरस्कृतकमलापुजारी इत्यस्या निधनेन शोकं प्रकटितवान्। सोशल मीडिया पोस्ट् मध्ये मोदीमहोदयः अवदत् यत् कृषिक्षेत्रे विशेषतः जैविककृषीप्रथानां प्रवर्धने स्वदेशीयबीजानां रक्षणे च महत्त्वपूर्णं योगदानं दत्तवान्। प्रधानमन्त्रिणा उक्तं यत् स्थायित्वस्य समृद्धीकरणे जैवविविधतायाः रक्षणे च कमलापुजारी इत्यस्या कार्यं वर्षाणि यावत् स्मर्यते। सः अवदत् यत् सा आदिवासीसमुदायस्य सशक्तिकरणे अपि दीपिका अस्ति।

## कांवडयात्रायां भक्तानां सुविधायै उत्तररेलविभागद्वारा विस्तृतव्यवस्था कृता



कांवडयात्रायां भक्तानां सुविधायै उत्तररेलविभागद्वारा विस्तृतव्यवस्था कृता अस्ति। हरिद्वार-नगरे सोमवासरात् आरभ्य कावड-मेलापकम् अवलोक्य एताः व्यवस्थाः कृताः इति रेलवे-संस्थायाः कथनम् अस्ति । कांवडयात्रायाः कृते हरिद्वारनगरं गच्छन्तीनां चत्वारि रेलयानानां विस्तारः कृतः इति रेलमार्गाधिकारिणः अवदन्। एतदतिरिक्तं पञ्च विशेषरेलयानानि प्रचलन्ति। तस्मिन् एव काले अनेकेषां रेलयानानां अतिरिक्तविरामस्थानानि निर्धारितानि सन्ति । रेलविभागेन अपि सूचितं यत् यात्रिकाणां मालवाहनस्य च क्षमतां वर्धयितुं २४ रेलयानेषु अतिरिक्ताः कोचव्यवस्था, योजिताः सन्ति।

## साइंस्-एडवांसेज-पत्रिकायां कोविडमहामार्याः विषये प्रकाशितम् अध्ययनं त्रुटिपूर्णम्



**हिमसंस्कृतवार्ताः।** सर्वकारः प्रोक्तवान् यत् साइंस्-एडवांसेज-पत्रिकायां भारते विंशत्युत्तर-द्विशत-तमाब्दे कोविडमहामार्याः अवधौ अत्यधिक-मृत्यु-प्रतिशततां प्रदर्शयन्ती सूचना तथ्यहीना स्वीकार्यानुमानयोः आधारिता वर्तते। स्वास्थ्य मन्त्रालयेन प्रोक्तं यत् पत्रिकायां प्रकाशितम् अध्ययनं त्रुटिपूर्णम् अस्ति सहैव लेखकैः स्वीकृतायां पद्धत्यां अनेकानि आधारभूतानि त्रुटयः सन्ति । मंत्रालयेन प्रोक्तम् यत् पत्रिकायां प्रकाशितानि तथ्यानि असंगतानि तथ्यहीनानि च सन्ति ।



## संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं अद्य सर्वदलीयोपवेशनम्

हिमसंस्कृतवार्ताः।सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं अद्य सर्वदलीयोपवेशनम् आहूतम् अस्ति । उपवेशनावधौ सर्वकारः संसदः द्वयोः सदनयोः सुचारु सञ्चालनाय सर्वाणि विपक्षिदलानि सहयोगाय प्रार्थयिष्यति । वित्त- सङ्कल्पना-सत्रं सोमवासरात् समारभ्यः आगामिमासस्य द्वादशदिनाङ्क यावत् प्रचलिष्यति । सामान्य-वित्तसङ्कल्पना-प्रपत्रम् मंगलवासरे प्रस्तोष्यते । एतत् नरेन्द्रमोदिनः सर्वकारस्य तृतीयकार्यकालस्य प्रथमं वित्त-सङ्कल्पना-सत्रम् अस्ति। विगते मासे संसदः द्वयोः सदनयोः संयुक्तोपवेशनं सम्बोधयन्ती राष्ट्रपतिः द्रौपदी मुर्मुवर्या अकथत् यत् एतत् वित्तसङ्कल्पना-प्रपत्रं सर्वकारस्य दूरगामि-नीतिनां भविष्योन्मुखस्य दृष्टिकोणस्य च प्रभाविप्रमाणं भविष्यति ।

## सुभाषितम्

**दातव्यं भोक्तव्यं धनविषये**
**संचयो न कर्तव्यः।**
**पश्येह मधुकरीणां**
**संचितार्थं हरन्त्यन्ये।**

**भावार्थः**- दान कीजिए या उपभोग लीजिए, धन का संचय न करें, देखिए मधुमक्खी का संचय कोई और ले जाता है॥

हिमसंस्कृतवार्ताः, डॉ.अमित शर्मा

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## थाईलैंड-क्रिकेटदलेन मलेशियादलं द्वाविंशति-धावनाङ्कैः पराजितम्



हिमसंस्कृतवार्ताः।महिला-एशिया-विंशति-प्रति-विंशति-क्रिकेट-चषके, थाईलैंड-दलेन श्रीलंकायाः रांगिरी-दांबुला अंतर्राष्ट्रिय- क्रिकेट-क्रीडाङ्गणे गतसायं मलेशियादलं द्वाविंशति-धावनाङ्कैः पराजितम्। चतुस्त्रिंशदुत्तरैकशतं धावनाङ्कानां लक्ष्यम् अनुसरता मलेशिया-दलेन अष्टक्रीडकानां हानौ एकादशोत्तरैकशतं धावनाङ्काः एव समर्जिताः । पणकं विजित्य सर्वप्रथमं थाईलैण्डदलेन त्रयविंशतदुत्तरैकशतं धावनाङ्काः समर्जिताः। विगतसायं पूर्वविजेतृदलेन भारतेन दांबुलायां क्रीडास्पर्धायाः प्रारम्भिके क्रीडाद्वन्द्वे पाकिस्तानः सप्तक्रीडकानां हानौ पराजितः।

## राष्ट्रिय-परीक्षाभिकरणम् एन टी ए इत्यनेन नीट-स्नातक-प्रवेश परीक्षायाः परिणामः उद्घोषितः

हिमसंस्कृतवार्ताः।राष्ट्रिय-परीक्षाभिकरणम् एन टी ए इत्यनेन नीट-स्नातक-प्रवेश परीक्षायाः परिणामः परीक्षा केन्द्रानुसारं स्वकीयान्तर्जालपटले उद्घोषितः अस्ति। एन टी ए इत्यनेन सर्वोच्च न्यायालयस्य निर्देशानन्तरं परिणामः अन्तर्जालपटले उद्घोषितः अस्ति । इतः पूर्वं न्यायालयेन एन टी ए प्रत्याशिनां परिचयरहितः परीक्षापरिणामः परीक्षाभिकरणस्य स्वकीये अन्तर्जालपटले द्वादशवादनं यावत् समुद्घोषितुं निर्देशः प्रदत्त आसीत् । परीक्षापरिणामः अधुना neet.ntaonline.in इति अन्तर्जालपटले समुपलब्धो वर्तते ।



## विदेशराज्य-मंत्री कीर्तिवर्धनसिंहेन बांग्लादेशे शिक्षारतानां भारतीय-छात्राणां सुरक्षायै आश्वासनं प्रदत्तम्

**हिमसंस्कृतवार्ताः।** बांग्लादेशे प्रवर्तमानं आरक्षण-विरुद्ध-प्रदर्शनम् अधिकृत्य प्रदर्शनकारिणां सुरक्षाबलानां च मध्ये जाते सङ्घर्षे न्यूनातिन्यूनाः चतुरधिकैकशतं जनाः मारिताः पञ्चशताधिक द्विसहस्रं जनाः च व्रणिताः जाताः, येन भारतीयच्छात्राः भारतं प्रत्यावर्तितुं विवशाः अभवन् । अवधेयं यत् प्रतिवेशिन्देशे प्राशासनिक सेवासु पुनरारक्षणं विरुध्य क्रेभ्यचित् सप्ताहेभ्यः व्यापकं विरोध-प्रदर्शनं प्रचलति । उत्तर-प्रदेश, हरियाणा, मेघालय, जम्मू-कश्मीर-राज्याणां छात्राः, सुरक्षानुरक्षण-माध्यमेन षट्-होरात्मिकां चिरयात्रां विधाय परह्यः पूर्वोत्तर-सीम्नः भारतं प्रत्यावर्तिताः। अन्तर्जालसेवायाः पिधानेन दूरभाष सेवानां च प्रभावितेन भारतीय- छात्राणां निजपरिवारैः सह सम्पर्कः बाधितः जातः येन ते अस्थायि-रूपेण बांग्लादेशं परित्यज्य भारतं प्रत्यावर्तितुं विवशाः अभवन् । छात्राणां, सर्वकार-समर्थकानां, सुरक्षा बलानां च मध्ये सङ्घर्षः विगते मासे समारब्धः, यद्यपि सोमवासरे सङ्घर्षः विवर्धितः यदा डाका-विश्वविद्यालये छात्राणां मध्ये विवादः सञ्जातः यस्मिन् मंगलवासरे षट् जनानां मृत्युरभवत् येन सर्वकारः सर्वान् विश्वविद्यालयान् पिनद्धुम् आदेशं प्रायच्छत्। विदेशराज्य-मंत्री कीर्तिवर्धन सिंहेन बांग्लादेशे शिक्षारतानां भारतीय-छात्राणां सुरक्षायै आश्वासनं प्रदत्तम् अस्ति।

# मणिमहेशयात्रा 28 अगस्ततः भविष्यति

## प्रत्येकं भक्तस्य भविष्यति पंजीकरणम्

## 'हेलीटैक्सी' इति सेवाऽपि उपलब्धा भविष्यति



**हिमसंस्कृतवार्ताः - चम्बा।** अस्मिन् समये उत्तरभारतस्य प्रसिद्धायां मणिमहेशयात्रायां प्रत्येकस्य भक्तस्य पञ्जीकरणं भविष्यति। यात्रा अगस्तमासस्य २८ दिनाङ्कात् सेप्टेम्बरमासस्य ११ दिनाङ्कपर्यन्तं भविष्यति। मणिमहेशं गच्छन् कोऽपि www.manimaheshyatra.hp.gov.in इत्यत्र पञ्जीकरणं कर्तुं शक्नोति। एषा सूचना एसडीएम भरमौरः कुलबीरसिंहराणा इत्यनेन यात्रायाः सज्जतायाः विषये बचतभवने आयोजितायां सभायां दत्ता। सभायाः अध्यक्षता विधानसभाध्यक्षः कुलदीपसिंहपठानिया अकरोत् । अस्यां गोष्ठ्यां मणिमाहेशयात्रायाः समये भक्तानां कृते प्रशासनिकदायित्वस्य, सुविधानां च चर्चा कृता । भक्तानां सुविधानां दृष्ट्या विधिव्यवस्था, मार्गस्य पुनर्स्थापनं, परिवहनसुविधाः, यातायात-पार्किङ्ग-प्रबन्धनं, स्वच्छता, पञ्जीकरणं, खाद्य-वास-व्यवस्था, जल-आपूर्तिः, चिकित्सा-सुविधाः, विद्युत्-ऊर्जा-सम्बद्धाः आवश्यकाः, दूरसञ्चार-सूचना-व्यवस्था च , सम्भाव्य आपदा उद्धारकार्यक्रमानाम् अतिरिक्तं पर्यटनस्य प्रचारसम्बद्धानां क्रियाकलापानाम् विषये विस्तृतचर्चा अभवत्। पठानिया सर्वेभ्यः विभागीयाधिकारिभ्यः निर्देशं दत्तवान् यत् यात्राकाले भक्तेभ्यः प्रदत्तसुविधाभिः सम्बद्धाः विविधाः कार्यव्यवस्थाः च समये एव सम्पन्नाः भवेयुः। सः अवदत् यत् अस्मिन् समये मणिमहेशयात्रायाः कृते भक्तानां कृते चम्बातः हेली-टैक्सी-सुविधां प्रदातुं सर्वकारः प्रयतते।

# IPS : संजीवरंजनः ओझा राज्यस्य सीआइडी इत्यस्य डीजीपी भविष्यति,



## चत्वारः नवीनाः डीजीपी प्राप्ताः

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे चत्वारः नवीनाः डीजीपीः प्राप्ताः। इतरथा भारतीयपुलिससेवायाः (आईपीएस) अधिकारी संजीवरंजनः ओझा इत्यस्मै राज्यस्य सीआईडी इत्यस्य प्रभारः दत्तः अस्ति। राज्यसर्वकारस्य मुख्यसचिवेन प्रबोध सक्सेना इत्यनेन अस्मिन् विषये आदेशाः प्रसारिताः। राज्यसर्वकारेण चत्वारः भारतीयपुलिससेवायाः अधिकारिणः डीजीपीरूपेण कृताः सन्ति । एतेषु १९९३ वर्गस्य भारतीयपुलिससेवायाः अधिकारिणः अनुरागगर्गः, अशोकः तिवारी, ऋत्विक रुद्रा च कार्य-आधारेण पदोन्नतिः प्राप्ताः । एते त्रयः भारतीयपुलिससेवायाः अधिकारिणः केन्द्रीयप्रतिनियुक्तौ सन्ति । यत्र १९९४ वर्गस्य भारतीयपुलिससेवायाः अधिकारी राकेश अग्रवालः नियमितरूपेण पदोन्नतिं प्राप्तवान् अस्ति। चतुर्णां पदोन्नतानां पुलिसाधिकारिणां स्तर १६ वेतनमात्रिकायाः लाभः दत्तः अस्ति। एतस्य अतिरिक्तं राज्यसर्वकारेण राज्यस्य सीआइडी इत्यस्य डीजीपी इत्यस्य प्रभारः आईपीएस-अधिकारिणे संजीवरंजनः ओझा इत्यस्मै समर्पितः अस्ति। भारतीयपुलिससेवायाः अधिकारी संजीवरंजनः ओझा १९८९ वर्गस्य भारतीयपुलिससेवायाः अधिकारी अस्ति। भारतीयपुलिससेवायाः अधिकारी संजीवरंजनः ओझा कारागारः तथा उन्नयनसेवा-महानिदेशकस्य पदे कार्यरतः अस्ति। अधुना तस्मै राज्यस्य सीआइडी इत्यस्य डीजीपी इत्यस्य अतिरिक्तप्रभारः दत्तः अस्ति। राज्यसर्वकारस्य मुख्यसचिवः प्रबोध सक्सेना इत्यनेन अस्मिन् विषये आदेशाः निस्सारिताः।

# विदेश-सचिवः विक्रम-मिस्री भारत-भूटानयोः परस्पर सम्बन्धान् च समधिकं सुदृढं कर्तुं भारतस्य प्रतिवद्धतां प्रकटितवान्



**हिमसंस्कृतवार्ताः।** विदेश-सचिवः विक्रम-मिस्री तस्य भूटानीयः समकक्षः औम-पेमा-चोडेनः च भूटाने तृतीयायाः भारत- भूटान-विकास-सहयोग-वार्तायाः सहाध्यक्षताम् अकुरुताम् । उपवेशनावधौ द्वावेव विदेश-सचिवौ त्रयोदशतम्याः पंचवर्षीय योजनायाः अन्तर्गतं विकाससहयोगस्य विभिन्नक्षेत्रेषु कार्यान्वयनशैल्याः सहयोगस्य च समीक्षां कृतवन्तौ । ध्यानास्पदं वर्तते यत् श्रीमिश्री भूटानस्य द्वि-दिवसीयायाम् आधिकारिक-यात्राम् अस्ति। विदेश-सचिवः विक्रम-मिस्री परह्यः भूटानस्य प्रधानमन्त्री शेरिंग-टोबगे इत्यनेन सह मेलनम् अकरोत् । श्रीमिश्री भूटानेन सह भारतस्य घनिष्ठ मैत्रि-सम्बन्धान् भारत-भूटानयोः परस्पर सम्बन्धान् च समधिकं सुदृढं कर्तुं भारतस्य प्रतिवद्धतां प्रकटितवान् ।

# ६,००० निराश्रितबालेभ्यः वैधानिक-अधिकार-प्रदाता हिमाचलं प्रथमं राज्यम्



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् हिमाचलप्रदेशः देशस्य प्रथमं राज्यं यत् राज्यस्य ६,००० तः अधिकेभ्यः निराश्रितबालेभ्यः वैधानिक-अधिकार-प्रदाय, तान् 'राज्यस्य बालकाः' इति रूपेण स्वीकृतवन्तः । राज्यसर्वकारेण निराश्रितबालानां सम्माननीयं जीवनं प्रदातुं दायित्वं स्वीकृतम् अस्ति। एतेषां बालकानां शिक्षणव्ययेन सह प्रतिमासं ४००० रूप्यकाणि कोषधनरूपेण सर्वकारः प्रदाति। एतदतिरिक्तं भूमिहीनानां निर्धनबालानां कृते गृहनिर्माणार्थं त्रिविश्वामिताभूमिः, गृहनिर्माणार्थं ३ लक्षरूप्यकाणि, स्टार्ट-अपपरियोजनायै २ लक्षरूप्यकाणि, विवाहव्ययार्थं २ लक्षरूप्यकाणि च आर्थिकसहायतां प्रदत्तानि सन्ति। शनिवासरे शिमलायां वेदविहार- पब्लिकस्कूल-एजुकेशनल-सोसायटी इत्यस्य अध्यक्ष के.एस. श्रीकोटः मुख्यमंत्री-सुखाश्रयकोषाय १,५४,०८,६५७ रुप्यकाणां सहायताराशिः चैकमाध्यमेन अददत्। एतस्याः राश्याः अतिरिक्तं ११० उत्पीठिकाः, १६ काष्ठपेटिकाः, ८४ आसन्दाः, त्रीणि वाद्ययन्त्राणि, विविधानि ज्ञानप्रदायकानि पुस्तकानि च समित्या प्रदत्तानि। अस्य उदारयोगदानस्य कृते मुख्यमन्त्री समित्याः आभारं प्रकटितवान् । एतेन समाजस्य सम्पन्नवर्गाः वंचितानाम्, आवश्यकतायुतानां जनानां हिताय अग्रे आगन्तुं प्रेरयिष्यन्ति इति सः अवदत्। अस्मिन्नवसरे शिक्षामन्त्री रोहितठाकुरः, हिमाचलप्रदेशविधानसभायाः उपाध्यक्षः विनयकुमारः, मुख्यसंसदीयसचिवः संजयः अवस्थी, कांग्रेसनेता सतपालरायजादा आदयः उपस्थिताः अभवन्।

# HRTC : हिमाचलपथपरिवहन-निगमस्य नादौने नूतनः बस-आगारः



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** हिमाचलपथपरिवहन-निगमस्य प्रबन्धनेन हमीरपुरजनपदस्य नादौनाय नूतनं बस-आगारं उपहाररूपेण दत्तम् अस्ति । राज्यसर्वकारस्य आदेशेन हिमाचलपथपरिवहननिगमस्य प्रबन्धनिदेशकः रोहनचन्दठाकुरः अधिसूचना प्रसारितवान्। अस्मिन् आगारस्य अन्तर्गतं के मार्गाः प्रचलन्ति इति विषये पृथक्-पृथक् आदेशाः निर्गताः भविष्यन्ति। नादौनम् हिमाचलपथपरिवहननिगमस्य अर्थात् एचआरटीसी इत्यस्य ३०तमः आगारः भविष्यति। हमीरपुरं विहाय नादौनमण्डले एषः द्वितीयः आगारः भविष्यति। अवधेयं वर्तते यत् नादौनं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः गृहक्षेत्रम् अस्ति । हमीरपुरमण्डले चिरकालात् अतिरिक्त-आगारस्य याचना आसीत् । नादौनं विगतत्रिवर्षेषु उद्घाटितस्य हिमाचलपथपरिवहन-निगमस्य सप्तमः आगारः अस्ति । पूर्वं संसारपुर-टेरेस्, नगरोटा, परवानणु, करसोगम्, जोगिन्दरनगरम्, नेरवा इत्यादिषु आगाराः उद्घाटिताः सन्ति । एकस्मिन् आगारे २० तः २५ यावत् अधिकारिणः कर्मचारिणः च नियोजिताः भवन्ति ।

# भारतस्य ऋतुविभागेन गुजरात, गोवा, मध्यमहाराष्ट्र, दक्षिणछत्तीसगढराज्येषु अतिवृष्टिः पूर्वानुमानितम्

हिमसंस्कृतवार्ताः। भारतस्य ऋतुविभागेन गुजरात, गोवा, मध्यमहाराष्ट्र, दक्षिणछत्तीसगढराज्येषु अतिवृष्टिः पूर्वानुमानितम् अस्ति। ऋतुविभागेन उक्तं यत्, ओडिशायां, तटीय आन्ध्रप्रदेशे, तेलङ्गानायां चापि प्रचण्डवृष्टिः सम्भविष्यति। आगामिषु चत्वारि-पञ्च-दिवसेषु गुजराते अतिवृष्टिः निरन्तरं भवितुं शक्नोति। मत्स्यजीविभ्यः परामर्शः प्रदत्तः यत् ते उत्तर पश्चिम, पश्चिम-मध्य-बङ्ग-खात्यां, उत्तर-आन्ध्रप्रदेशे, ओडिशा, पश्चिमबङ्ग-समीपस्थेषु बाङ्गलादेश-तटेषु कार्यं न कुर्वन्तु इति।

# गुरुपूर्णिमावसरे श्रीवेदव्यासस्मरणम्




महर्षि-वशिष्ठस्य शतपुत्राः, तेषु ज्येष्ठः शक्तिनामधेयः। शक्तिः कस्मादपि कारणात् राजानं कल्माषपादम् अभिशप्तवान् यत् भवान् राक्षसः भवतु इति। स हि कल्माषपादः तेषां महाकालः सञ्जातः, शक्तिना सह वशिष्ठमुनेः शतपुत्रान् सः भक्षितवान्। पुत्रवियोगम् असहमानः शोकसंतप्तः वशिष्ठमुनिः सरस्वतीनदीं पतित्वा आत्महत्यार्थं सन्नद्धः जातः चेदपि सरस्वतीदेवी साक्षात् प्रकटीभूय तं रक्षितवती। वंशनाशदुःखात् स मर्तुम् इच्छति स्म, परन्तु शक्तिपत्नी अदृश्यस्ती गर्भवती अस्तीति ज्ञात्वा शोकम् अत्यजत्। यथासमयम् अदृश्यस्ती एकं पुत्रसन्तानं प्रसूतवती। तस्यनाम पराशरः इति जातम्। कालक्रमे अयं मन्त्रद्रष्टा जातः। म्रियमाणाय वशिष्ठाय सः पुनर्जीवनं दत्तवान् इत्यतः तस्य नाम 'पराशरः' इति। वशिष्ठमुनिः सयत्नं तस्य पालन-पोषणं कृतवान्। एकदा पराशरः मातुः पुरस्तात् हि पितामहं वशिष्ठं 'पितः!' इति सम्बोधितवान्। तदा तस्य जननी तं ज्ञापितवती यत् अयं भवतः पितामहः हि, न वा पिता इति। अनन्तरं सः मातृमुखात् ज्ञातवान् यत् तत्पितरं एकः राक्षसः भक्षितवान् इति। तज्ज्ञात्वा सः क्रोधेन उत्तुङ्गतां गतः। वशिष्ठः तं समाश्वास्य तस्मै धैर्यं प्रदत्तवान्। तथापि सः तस्य राक्षसस्य नाशार्थं राक्षसयज्ञं सम्पादितवान्, तस्य यज्ञस्य पुरोहितः पुलस्त्यमुनिः आसीत्। एकदा पराशरः यमुनानदीम् उपस्थाय नदीं तरीतुम् ऐच्छत्, विशेषकार्यार्थम्। तदा एका धीवरपुत्री मत्स्यगन्धा नौकया ऋषिम् अपरतीरं प्रापयितुम् उत्सुका जाता। ऋषिः नौकाम् आरूढवान्। गमनसमये ऋषिः धीवरपुत्रीरूपे मुग्धः जातः, गान्धर्वप्रथानुसारं तां परिणीतवान् अपि। तपोबलेन ऋषिः नदीमध्ये हि एकं द्वीपं सृष्ट्वा तत्रैव मत्स्यगन्धया सह रमणं कृतवान्। सा ऋषिवरदानेन मत्स्यगन्धातः पद्मगन्धा जाता, सत्यवती इति नाम्ना सा प्रसिद्धा अभवत्। गच्छता कालेन सा एकं पुत्ररत्नं प्रसूतवती। तस्य शिशोः शरीरं श्यामवर्णीयम् आसीत्, अतः 'कृष्णः' इति तस्य नाम जातम्। द्वीपे जन्म इत्यतः तस्य अपरनाम 'द्वैपायनः' इति नाम्ना ख्यातः अभवत् सः। तेन वेदस्य विभाजनं कृतम्, अतः अन्यत् नाम 'वेदव्यासः' इति। शास्त्रानुसारं सः भगवतः नारायणस्य अंशावतारः वर्तते। भारतीयम् ऐतिह्यम्, परम्परागता साहित्य-संस्कृतिः इत्यादिषु वेदव्यासस्य अतुलनीयम् अवदानं वर्तते। पूर्वं वेदः एकः हि आसीत्, कलिकालस्य उपक्रमम् अभिज्ञाय तेन वेदः चतुर्षु भागेषु विभाजितः। ते ऋक्, यजुः, सामः, अथर्वः चेति। इतिहासः एवं पुराणसमूहः पञ्चमवेदत्वेन स्वीक्रियते। महाभारत-नामकं महाकाव्यमपि तस्यैव कृतिर्वर्तते। एवमेव श्रीमद्भागवतं वेदव्यासस्य अमरकृतित्वेन लोके राजमानम् अस्ति। तस्य अपरनाम 'वादरायणः' इति। तेन वेदान्तग्रन्थः विरचितः। प्रस्थानत्रयम् इत्युक्ते उपनिषत्, भगवद्गीता, वेदान्तसूत्रं चेति, यस्य स्रष्टा भगवान् वेदव्यासः आख्यायते। व्यासोच्छिष्टं जगत्सर्वम् इति।

**✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः**

## संस्कृतविद्यास्थानानि- ४ वेदानां रचनाकालः

वेदः अपौरुषेयः, ईश्वरेण ऋषीणां हृदये तस्य प्रकाशनं कृतम् अतः सः कालातीतः इति भारतीयपरम्परा। तथापि पाश्चात्त्यैः वेदस्य अध्ययनम् आरब्धं तदाप्रभृति तेषां रचनाकालस्य विषये विचारः प्रचलितः। १८ तमे शतके वेदानां भाषाशैली, तेषां रचनावैशिष्ट्यानि, वेदेषु प्राप्ताः खगोलीयभूवैज्ञानिकसन्दर्भाः एतान् अवलम्ब्य पाश्चात्त्यैः, तेषामनुकरणेन च आधुनिकभारतीयविद्वद्भिरपि वेदानां रचनाकालस्य निर्धारणार्थं प्रयत्नाः आरब्धाः।

**अ) मैक्समुलरः-** वेदानां कालनिर्धारणस्य सर्वप्रथमः प्रयत्नः अनेन कृतः। बुद्धेन वैदिक्याः यज्ञीयहिंसायाः खण्डनं कृतम्। एतदेव आधारीकृत्य वेदस्य रचनाकालः बुद्धात् पूर्वम् अस्तीति मोक्षमुलरेण प्रतिपादितम्। तेन निर्धारिताः वेदरचनाकालस्य विभागाः–

**१) छन्दःकालः** (ई. पूर्वं १२००तः १०००)- प्रथमं निविद्-मन्त्राः तथा च केचन अन्येऽपि मन्त्राः स्फुटरूपेण तदा तदा रचिताः अभवन्।

**२) मन्त्रकालः** (ई पूर्वं १०००तः ८००)- अस्मिन् कालावधौ मन्त्रसंहिताः रचिताः अभवन्।

**३) ब्राह्मणकालः** (ई पूर्वं ८००तः ६००)- एतस्मिन्काले वेदमन्त्राणां व्याख्यानरूपाणि ब्राह्मणानि रचितानि।

**४) सूत्रकालः** (ई पूर्वं ६०० तः ४००)– अस्मिन्काले श्रौतादीनि सूत्राणि रचितानि अभवन्।

तथापि बोगाझकोई इत्यत्र ई पूर्वं १४०० मध्ये निर्मितानां शिलालेखानां प्रापणात् मोक्षमुलरस्य मतं सर्वथा निरस्तम् अभवत् यतः एतेषु शिलालेखेषु इन्द्रवरुणादीनां वैदिकदेवतानाम् उल्लेखः प्राप्यते।



**२) वेबरः–** एतस्य मतेन योग्यसंसाधनानाम् अभावात् वेदस्य कालनिर्धारणं सर्वथा अशक्यं भाति। स्वस्य History of Indian literature इत्यस्मिन् ग्रन्थे तेन अङ्गीक्रियते यत् any such attempt at defining the antiquity of the Vedas is absolutely fruitless.

**३) जैकोबी–** गृह्यसूत्रेषु विवाहसंस्कारविधिवर्णने ध्रुवदर्शनस्य उल्लेखः प्राप्यते। ध्रुवतारकायाः एतम् उल्लेखम् अवलम्ब्य खगोलीयगणनाधारेण जैकोबीमहोदयेन ई पूर्वं ४५०० इति वेदरचनाकालः निर्धारितः।

**३)बालगङ्गाधरतिलकः-** वसन्तसम्पातदिने विद्यमानानां नक्षत्राणां ये उल्लेखाः वैदिकवाङ्मये प्राप्यन्ते तदाधारेण तिलक-महोदयेन वेदानां रचनाकालस्य चत्वारः विभागाः प्रदर्शिताः-

**अ) अदितिकालः** (ई पूर्वं ६००० तः ४०००)- एषः निविद्-मन्त्राणां रचनाकालः।

**आ) मृगशीर्षकालः** (ई पूर्वं ४००० तः २५००)- ऋग्वेदस्य प्रायः सर्वेषां सूक्तानां रचना।

**इ)कृत्तिकाकालः** (ई पूर्वं २५०० तः १४००) – चतुर्णां वेदानां सङ्कलनम्।

**ई) सूत्रकालः** (ई पूर्वं १४००तः ५००)- सूत्रग्रन्थानां दर्शनानां च निर्मितिः।

**४) दयानन्दसरस्वती–** पारम्पारिकं मतम् अवलम्ब्य महोदयेन वेदानाम् आविर्भावः सृष्टेः आविर्भावेन समानः इति प्रतिपादितम्।

**५) अविनाशचन्द्रदासः–** वेदे सरस्वतीनद्याः वर्णनं प्राप्यते। एषा नदी इदानींतने राजस्थानप्रदेशे अनन्तरं विलुप्ता अभवत्। एषा घटना ई पूर्वं २५००० मध्ये घटिता। ततः पूर्वमेव ऋग्वेदस्य रचना पूर्णा जाता आसीत्।

**६) शङ्करदीक्षितः-** शतपथे प्राप्तस्य कृत्तिकावर्णनस्य आधारेण तस्य ग्रन्थस्य कालः ई पूर्वं २५०० इति निर्धार्य ततः पूर्वम् एकसहस्रं वर्षाणि संहिताकालः स्यात् इति एतेन महोदयेन प्रतिपादितम्।

**७) विंटरनिटत्स–** एतेन महोदयेन सर्वेषां मतानां समन्वयं कृत्वा ई पूर्वं २५०० इति संहिताकालः अस्तीति प्रतिपादितम्। श्री अभिजित् तोडकर abhitdkr9@gmail.com

## (४२८) प्राच्यविद्या. .शिव स्वरोदयशास्त्रम्

भारतं सहस्राधिकवर्षपूर्वस्य ज्ञानेन, प्रज्ञायाः कृते प्रसिद्धम् अस्ति . वयं सर्वे १४ विद्या ६४ कला च जानीमः , परन्तु प्राच्यविद्या इति प्रसिद्धाः बहवः सन्ति। एषः महान् वरदानः, योग :, स्वरोदयः, आयुर्वेद, संगीतस्य, दर्शनशास्त्रस्य च विभिन्नानां विद्यालयानां इत्यादीभारतीयविज्ञानानाम् पुनरुत्थानस्य, प्रचारस्य च अवसरः अस्ति। भारतीयपरम्परा आधुनिकवैज्ञानिकपरम्परायाः समर्थनं, पुष्टीकरणं, पूरकं च विविधस्तरयोः कर्तुं शक्नोति। आधुनिकविज्ञानस्य सर्वाधिकं शक्तिशाली प्रभावः अस्ति यत् सत्यस्य यथार्थस्य च अन्वेषणार्थं तथाकथितानां रहस्यवादी, गूढ, साम्प्रदायिक, प्रायः अस्पष्टक्षेत्राणां पृष्ठतः तथ्यात्मकं काल्पनिकं च पक्षं ज्ञातुं, निश्चयं च कर्तुं वस्तुनिष्ठसाधनं पद्धतयश्च अस्मान् प्रदत्तवन्तः। स्वरोदयः तादृशं क्षेत्रम् एकम् । स्वरस्य (विशेषतः पक्षिषु, पशवेषु, मनुष्येषु च श्वसनतन्त्रम्) स्थूलदृश्यानि अधिकं च सूक्ष्मविशेषतानि सम्बोधयन्ति



sudha_sathaye@yahoo.com

१) श्वासः - निःश्वासः
२) नासिकागुहाद्वयेन
(कीटेषु नासिकाच्छिद्राणि, वा छिद्राणि
३) आन्तरिकबाह्यविरामाः
४) दीर्घ .. लघु
५) वैकल्पिकं उद्घाटनं समापनञ्च
६) अवधि - आवृत्ति
७i) दिशा पार्श्व, उपरि-अधः
८) गुणाः (उष्ण-शीत, गुरु-लघु)
९) आयतन
१०) बलम्
११) कालः
१२) समरूपता - विषमता
१३) जटिलता
१४) क्रमविकार :
१४) एकरूपता
१५) उद्घाटितं निमीलितम्
१६) स्थिर गतिशील
१७) रेखीयता - अरेखीयता
१८) स्वैच्छि अनैच्छिक
१९) पञ्चमहाभूताः
२०)काल

२१) गतिः स्वरोदयेन तस्य विज्ञानं कृतम्, यद्यपि अधिकव्यक्तिगत रूपेण । परिचालनप्रतिरूपस्य, केचन मापनयन्त्राणां च परिकल्पनाविकासाय केचन प्रयत्नाः कृताः परन्तु अल्पसफलता प्राप्ता । अस्य समस्यायाः समाधानार्थं अधुना आधुनिकविज्ञानं यावत् अस्ति। स्वारोदय, सूक्ष्मजगत्, स्थूलविश्वयोः स्वराविषये वर्णयति । मनुष्ये प्राणस्य व्यवहारं वामदक्षिणनासिकाद्वारा श्वास-निःश्वासः इति प्रतिपादयति ये च शरीरस्य एकेन अर्धेन सह सम्बद्धाः सन्ति तथा च क्रमशः अर्धनारी, अर्धपुरुषस्य शिवस्य आकृतिः अर्धनारीश्वरस्य प्रतीकाः भवन्ति । एतत् द्वन्द्वं एकस्यैव सत्तायाः परस्परं विपरीतम् तथापि पूरकपक्षं यथा सूर्यचन्द्रौ, पूर्वपश्चिमौ, दिशायां प्रतिघटिकादिशायां च, दिवारात्रौ वा तादृशानां कस्यापि सार्वत्रिकघटनानां कृते तिष्ठति एते विपर्ययाः पारमार्थिकसिद्धान्तस्य पक्षाः सन्ति। आधुनिकविज्ञाने एतत् एन्थ्रोपिक् सिद्धान्तस्य समानान्तरम् अस्ति । एवं अर्धनारीश्वरः सांस्कृतिकसार्वभौमिकं प्रतीकम् अस्ति । ... संकलितम्

**अनुवादितम् सुधा साठ्ये मुंबई।**